# १३ त्रयोदश दशकः - उतथ्य महिमा

अथागतः कश्चि दधिज्य धन्वा मुनिं निषादः सहसा जगाद ।
त्वं सत्यवाग्ब्रूहि मुने त्वया किं दृष्टः किटिः सायकविद्ध देहः ॥ १३-१॥

दृष्टस्त्वया चेद्वद सूकरः क्व गतो न वाऽदृश्यत किं मुनीन्द्र ।
अहं निषादः खलु वन्यवृत्तिः ममास्ति दारादिक पोष्यवर्गः ॥ १३-२॥

श्रुत्वा निषादस्य वचो मुनिः स तूष्णीं स्थितश्चिन्तयति स्म गाढम् ।
वदामि किं दृष्ट इतीर्यते चेत् हन्यादयं तं मम चाप्यघं स्यात् ॥ १३-३॥

सत्यं नरं रक्षति रक्षितं चेत् असत्य वक्ता नरकं व्रजेच्च ।
सत्यं हि सत्यं सदयं न किञ्चित् सत्यं कृपाशून्य मिदं मतं मे ॥ १३-४॥

एवं मुनेश्चिन्तयतः स्वकार्य व्यग्रो निषादः पुनरेव मूचे ।
दृष्टस्त्वया किं स किटिर्न किं वा दृष्टः स शीघ्रं कथयात्र सत्यम् ॥ १३-५॥

मुनिस्तमाहात्र पुनः पुनः किं निषाद मां पृच्छसि मोहमग्नः ।
पश्यन् न भाषेत न च ब्रुवाणः पश्येदलं वाग्भि रवेहि सत्यम् ॥ १३-६॥

उन्मादिनो जल्पन मेतदेवं मत्वा निषादः सहसा जगाम ।
न सत्यमुक्तं मुनिना न कोलो हतश्च सर्वं तव देवि लीलाः ॥ १३-७॥

द्रष्टा परं ब्रह्म तदेव च स्यात् इति श्रुतिः प्राह न भाषते सः ।
सदा ब्रुवाणस्तु न पश्यतीदं अयं हि सत्यव्रत वाक्य सारः ॥ १३-८॥

भूयः स सारस्वत बीजमन्त्रं चिरं जपन् ज्ञान निधिः कविश्च ।
वाल्मीकिवत्सर्व दिशि प्रसिद्धो बभूव बन्धून् समतर्पयच्च ॥ १३-९॥

स्मृता नता देवि सुपूजिता वा श्रुता नुता वा खलु वन्दिता वा ।
ददासि नित्यं हित माश्रितेभ्यः कृपार्द्र चित्ते सततं नमस्ते ॥ १३-१०॥